# Shakyasimha Stotram

# શાક્યસિંહસ્તોત્રમ્ ૬

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram6.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

Shakyasimha Stotram

# શાક્યસિંહસ્તોત્રમ્ ૬

નૌભિ શ્રીશાક્યસિંહં સકલહિતકરં ધર્મરાજં મહેશં
સર્વજ્ઞં જ્ઞાનકાયં ત્રિમલવિરહિતં સૌગતં બોધિરાજમ્ ।
ધર્માધારં મુનીન્દ્રં દશબલબલિનં શ્રીઘનં વિશ્વરૂપં
સમ્બુદ્ધં લોકનાથં સકલભયહરં સંસ્થિતં મર્ત્યલોકે ॥ ૧॥

યસ્ત્વં ધર્માધિમેશં(પેશઃ) સકલજિનસુતૈઃ સંશ્રિતઃ શ્વેતકેતુ-
રિત્યાખ્યાં બોધિહેતુસ્તદનુ ચ તુષિતા ચાગતા બોધિરાજ ।
મૈત્રેયં સ્થાપયિત્વા પ્રમુદિતમનસં સ્વાસને ચાભિષિચ્ય
માયાગર્ભે પવિત્રેઽશુચિમલરહિતે રત્નવ્યૂહે નિવેશ ॥ ૨॥

ગર્ભે સ્થિત્વાઽપિ યસ્ત્વં સકલહિતકરીં ધર્મવ્યાખ્યાં કરોષિ
કાલે માતુઃ સુકક્ષાત્સકલનિજકરૈઃ કાશયત્ સંપ્રજાતઃ ।
લોકાચારં ચ કૃત્વા વિહિતદશવિધિં વૈ વિવાહાદિ તત્તત્
ત્યક્ત્વા સર્વાંશ્ચ રાજ્યં સકલજનહિતે નિર્ગતં ત્વાં નમેઽહમ્ ॥ ૩॥

ઊર્ણાકોશાચ્ચ યસ્ય પ્રતિદિનમસકૃત્ દક્ષિણાવર્તરોચિઃ
પ્રોદ્યદ્દીપ્યમાનત્રિભુવનકુહરધ્વસ્તમોહાન્ધકારમ્ ।
ચત્વારિંશત્સુદન્તોદ્ગલિતકરચયૈર્ભાપયન્નારકીયાન્
પ્રોદ્ધૃત્વા સ્વર્ગલોકે સુરતરુકલિતે સ્થાપિતા યેન વન્દે ॥ ૪॥

યત્પાણી ચક્રચિહ્નાવભિમતફલદૌ દાનપારઙ્ગતત્વો-
ધત્કાન્તા ભૂમિદેવી સ્વગણપરિવૃતા ભેદયિત્વાઽવનિં તામ્ ।
સ્થિત્વાગ્રે પૂજયિત્વા નમુચિમભિગતં ભર્ત્સયિત્વા દ્વિષન્તં
સાક્ષીભૂતા નિલીના પ્રણમિતશિરસા ત્વાં નમેઽહં જિનેન્દ્રમ્ ॥ ૫॥

યસ્યોદ્ગ્રીવસ્ય ચાગ્રે વિધિહરમધુહૃલ્લોકસંસ્થૈઃ પ્રવીણૈર્
દ્રષ્ટું નૈવાભિશક્ત્યા કિમુ મનુજપુરે વાસિતૈર્માદૃશૈશ્ચ ।
બ્રહ્માણ્ડં લઙ્ઘયિત્વા તરણિશશધરૌ ઘૌશ્ચ નક્ષત્રલોકં
ઊર્ધ્વં લોકોત્તરાખ્યે નિજભુવનવરે ભાસિતં ત્વાં નમેઽહમ્ ॥ ૬॥

યદ્વક્ત્રં પઙ્કજાભં સુરદનવસનાકર્ણિકાકેસરાઢ્યં
બ્રહ્માણ્ડં જૂમ્ભતેઽસ્મિન્ ભુવનગણવૃત્તં સંશ્રિતં કર્ણિકાવત્ ।
દૃષ્ટ્વા સમ્મૂર્ચ્છિતોઽભૂન્નમુચિરનુચરૈસ્ત્રાસિ સર્વજ્ઞનાથ
કૃત્વા કેચિત્પ્રયાતાઃ શરણમભિમતં શ્રીઘનં ત્વાં નમેઽહમ્ ॥ ૭॥

સઙ્ખ્યાજ્ઞાનપ્રવીણાસ્ત્રિભુવનસદને પણ્ડિતા યે વસન્તિ
તૈઃ સર્વૈર્મીલયિત્વા યદિ તવ મહિમા વર્ણ્યતે કલ્પકાલમ્ ।
પારં ગન્તું સમર્થા નહિ નિખિલગુણક્ષીરસિન્ધોઃ કથઞ્ચિદ્
એકાકી કિં સમર્થાસ્તદપિ મમ મનો બોધનાર્થં નમે ત્વામ્ ॥ ૮॥

પઠ્યન્તે સ્તોત્રમેતત્સુરપતિરચિતં સ્રગ્ધરાવૃત્તસંજ્ઞં
શક્રાદ્યા લોકપાલાઃ પ્રતિપદનુચરાઃ સઙ્કરિષ્યન્તિ રક્ષામ્ ।
સૌખ્યં ભુક્ત્વેહ લોકે તદનુ સુરપતેઃ કલ્પવૃક્ષાભિકીર્ણે
સ્થિત્વા ગચ્છન્તિ ચાન્તે સુગતસુતમહીં સર્વલૌકૈકગમ્યામ્ ॥ ૯॥

ઇતિ સુરપતિકૃતં શ્રીશાક્યસિંહસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*